# शृणु मम वचनम्

## आमुखम्

शिशुगीतानि छात्रेभ्यः रोचकानि सन्ति। शृणु मम वचनं नाम गीतं परितः विद्यमानानां पशुपक्षिणां नाम परिचायनाय उपकरोति। संघशः वैयक्तिकतया च आलपनं, जीविनां नामपरिचायनं, तेषां वर्गीकरणं, आमन्त्रणनिमन्त्रणवाचकानां प्रयोगः इत्यादीनि पाठभागेऽस्मिन् अन्तर्भवन्ति।

पाठनाम - शृणु मम वचनम्।

कालांशः - १०

उद्देश्यम् - प्रकृत्यां विद्यमानेषु लघुकार्येषु श्रद्धा।

नैपुणी - जीविनां नामपरिचयः,वर्गीकरणम्।

| आशयाः / धारणाः / व्यवहाररूपाणि | पठनप्रवर्तनानि / पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| स्वं परितः विद्यमानेषु लघुविषयेषु श्रद्धा । बालकविता । | संघशः वैयक्तिकतया च सतालमालपनम्। परितः विद्यमानानां पशुपक्षिणां नामपरिचायनम्। गार्ह्यजन्तूनां वर्गीकरणम्। वाक्यपूरणम्। क्रियारूपपरिचायनम्। | उचिततालेन स्फुटतया च गीतम् आलपति। जीविनां नामानि परिचिनोति। वर्गीकरणसामर्थ्यं प्राप्नोति। वाक्यपरिचयं पदपरिचयं च सम्पादयति। |

अध्यापकः कक्ष्यायां कामपि कथां वदति। विद्यालयं गच्छन्ती सुजा मध्येमार्गम् कमपि आम्रवृक्षम् अपश्यत्। वृक्षे सर्वत्र बहूनि पक्वानि आम्रफलानि। 'युष्माकं गृहं परितः आम्रवृक्षः अस्ति वा? आम्रफलं सर्वेभ्यः रोचते वा? के के आम्रफलं खादन्ति?
अन्ये के आम्रफलं खादन्ति?' इत्यादीन् प्रश्नान् छात्रान् पृच्छतु। आशयं प्रकाशयितुम् अवसरः दातव्यः। तत्र वृक्षे प्रतिशाखं गच्छन् एकः चिक्रोडः आसीत्। चिक्रोडं दृष्ट्वा सुजा तं प्रति किं किम् अपृच्छत् इति छात्रान् पृच्छति, छात्राणाम् उत्तराणि क्रोडीकरोति। ततः सुजा चिक्रोडं किं किम् अपृच्छत् इति पश्यामः इत्युक्त्वा पाठभागं प्रविशति।

**प्रवर्तनम् - १ सस्वरवाचनम् / आलपनम्।**

**उद्देश्यम् - विविधैः तालैः स्फुटतया च आलपनम्।**

अध्यापकः चार्ट्पत्रे श्यामफलके वा पाठपुस्तकस्थस्य गीतस्य एकैकं पादं विलिख्य प्रदर्शयति।

ततः उच्चैः सतालम् आलपति। छात्रान् अनुगानाय प्रेरयति। अध्यापकः द्वित्रवारं गीतमिदं स्फुटतया आलपतु छात्राः अनुगायन्तु।

छात्राः संघे स्थित्वा गीतमिदं पाठपुस्तकं वीक्ष्य विविधैः तालैः सह आलपन्तु। प्रतिसंघम् उचितं साहाय्यं करोतु। वैयक्तिकतया च प्रवर्तनमिदं करणीयम्।

**आलपनस्पर्धा।**

एकां गीतालपनस्पर्धां चालयितुं यतन्ताम्। तदर्थं अध्यापकः साहाय्यं करोतु, मूल्यनिर्णयांशान् कक्ष्यायां प्रदर्शयतु।

**मूल्यनिर्णयसूचिकाः।**

उचितः तालः।

उच्चारणस्फुटता।

सर्वेषां भागभागित्वम्।

सुचिकाः अनुसृत्य गीतालपनस्पर्धार्थं छात्रान् सज्जीकरोतु। एकस्य संघस्य अवतारणसमये इतरे संघाः मूल्यनिर्णयं कुर्वन्तु। यः संघः मूल्यनिर्णयांशान् अनुसृत्य उत्तमरीत्या आलपति, सः अभिनन्दनीयः।

**प्रवर्तनम् - २ वाक्यनिर्माणम्।**

**उद्देश्यम् - जीविनां नामानि उपयुज्य वाक्यलेखनम्।**

अध्यापकः पाठपुस्तकस्थानि जीविनां चित्राणि चार्ट्पत्रे विलिख्य प्रदर्शयतु, निरीक्षणाय वदतु। तानि दृष्ट्वा जीविनां नामानि वदन्तु छात्राः। तानि नामानि योजयित्वा वाक्यानि श्यामफलके लिखतु अध्यापकः। ततः पठनाय निर्दिशतु। अवश्यं साहाय्यं दातव्यम्। अनन्तरं टिप्पणीपुस्तके लिखन्तु।

यथा सिंहः मृगराजः भवति।

पिकः मधुरं गायति।

शुकः आम्रं खादति।

पिपीलिका मन्दं चलति।

मार्जारः क्षीरं पिबति।

**अनुबन्धप्रवर्तनम्।**

**पट्टिकाकरणम्।**

अध्यापकः चार्ट्पत्रे केषाञ्चन जन्तूनां नामानि चित्रसहितं प्रदर्शयति। चित्रे शुकः, सिंहः, पिकः, पिपीलिका, मार्जारः, धेनुः, शुनकः, अजः, बकः, काकः इत्यादयः भवेयुः। चित्रं निरीक्ष्य छात्राः नामानि मातृभाषया वदन्तु। तानि नामानि अध्यापकः संस्कृतभाषया उच्चैः वदति, श्यामफलके लिखति च। छात्रेषु एकः उच्चैः वदतु अन्ये अनुवदन्तु।



काकः



सिंहः



शुकः



पिपीलिका



अजः



धेनुः



शुनकः



मार्जारः



बकः



पिकः

ततः तेषु जीविषु पक्षिणः के जन्तवः के इति वर्गीकरणाय यतन्ताम्। तदर्थं छात्रान् प्रेरयतु, छात्राणाम् उत्तराणि क्रोडीकृत्य लिखतु।

यथा

| **पक्षिणः** | **जन्तवः** |
|---|---|
| शुकः | सिंहः |
| पिकः | पिपीलिका |
| बकः | मार्जारः |
| काकः | धेनुः |
| | अजः |
| | शुनकः |

क्रोडीकरणानन्तरं तेषु जन्तुषु गार्हिकजन्तवः( Domestic animals ) के इति पृच्छतु। तदर्थं छात्राणां गृहे के के जन्तवः सन्तीति ते वदन्तु। ततः गार्हिकजन्तूनां नामानि कक्ष्यायां प्रदर्शयतु। छात्राः तानि नामानि उच्चैः पठन्तु टिप्पणीपुस्तके लिखन्तु।

यथा -

**गार्हिकजन्तवः।**

धेनुः

शुनकः

अजः

मार्जारः

एवं परितः विद्यमानानाम् अन्येषां जीविनां नामानि सञ्चित्य वदन्तु, टिप्पणीपुस्तके लिखन्तु च।

**मूल्यनिर्णयसूचिके।**

आशयावगमः।

उचितं लेखनम्।

**पदचयनम्।**

**उद्देश्यम् - अक्षराण्युपयुज्य पदलेखनम्।**

अध्यापकः 'क्र, त्र, घ्र, म्र' इत्यादीनि अक्षराणि कक्ष्यायां श्यामफलके विलिख्य प्रदर्शयति। उच्चैः स्फुटतया च द्वित्रवारं पठति। तानि अक्षरसहितानि पदानि पाठभागे अस्ति वा? अस्ति चेत् तानि कानि इति पृच्छतु अध्यापकः। छात्राः पाठपुस्तकं निरीक्ष्य पदानि विविच्य पठन्तु टिप्पणिपुस्तके लिखन्तु।

यथा -

चिक्रोडः, शीघ्रम्, कुत्र, मित्रम्, आम्रम्।

**अकारान्तनपुंसकलिंगपदानां परिचायनम्।**

पाठपुस्तकस्थानाम् अकारन्तानपुंसकलिङ्गरूपाणां प्रथमाविभक्तौ एकवचनद्विवचनबहुवचनरूपाणां परिचायनाय छात्रान् सज्जीकरोतु। प्रथमतया पाठपुस्तकस्थानि रूपाणि उच्चैः पठति, श्यामफलके लिखति च। छात्रान् अनुवाचनाय प्रेरयतु। एवम् अन्यानि नपुंसकलिङ्गपदानि परिचाययतु।

यथा -

| | | |
|---|---|---|
| भवनम् | भवने | भवनानि |
| वाहनम् | वाहने | वाहनानि |
| मुखम् | मुखे | मुखानि |

चित्रदर्शनं, चित्ररचना च मनोरञ्जकं भवति। अस्मिन् पाठे विद्यमानस्य चित्रस्य रचना सङ्गणकयन्त्रस्य साहाय्येन कर्तुं छात्रेभ्यः उचितं साहाय्यं दातव्यम्। तदर्थं जिम्प् (GIMP) तन्त्रांशः साहाय्यकः भवति।

○